।। श्रीगुरुःशरणम्।।

।। अथात्मपूजा।।

।। अथ प्रबोधः।।

अजितामृत योगनिद्रिताच्युतशक्ते स्वकृतातिमोहित।।
द्युमुखे श्रुतिबन्दिगीततो भगवज्जागृहि जागृहि त्र्यधीट्।।१।।

।। अथात्मपूजादीपिका।।

श्रीगणेशाय नमः। प्रथमं तावदुत्थापनमाह। हे **अजित**, स्वयंप्रकाशित्वादद्वैतत्त्वात्त्वं न केनापि पराभूत इति भावः। तर्ह्यहं कथं बद्ध इत्यत आह। हे **अमृत** मोक्षरूपिन्। तर्हि देहाद्यवेष्टितस्य कथँ मोक्षरूपत्वमित्यत आह। अध्यासेन **योगनिद्रा** संञ्जातास्य तत्संबुद्धौ। अत एव **स्वक**र्मणा **मोहित** मोहावस्थायामप्य**च्युता** ज्ञानशक्तिर्यस्य *'ज्ञोऽत एवेति'* न्यायात्। तथाहि। 'अचिद्रूपोऽथ चिद्रूपो जीवोऽचिद्रूप इष्यते।। चिदभावात्सुषुप्त्यादौ जाग्रच्चिन्मनसा कृता।। ब्रह्मत्वादेव चिद्रूपश्चित्सुषुप्तौ न लुप्यते।। द्वैतादृष्टिर्द्वैतलोपान्न हि द्रष्टुरिति श्रुतेः'। स्वप्नोपमेष्टयोगवियोगात्मकसुखदुःखफलप्रदप्रकृतपुष्यपापौघशमक्षमशक्ति-मांस्त्वमसीति सूचितमेतेन। ननु मिथ्याभूतादपि स्वप्नाद्यथा भयं तथा मिथ्याभूतस्वकृतकर्मजन्यमोहादपि भयमिति चेद्बाढम्। तथाविधमपि स्वप्नोत्थितं न भीषयति तद्वदिदमपीत्यतो **द्युमुखे** गुरूपसत्तिलक्षणे प्रत्यूपे **जागृहि** प्रमादनिद्रां विहाय बुध्यस्व। ननु स्वत एव कथं गाढनिद्रातो बुध्यतामित्यत आह। **श्रुतिबन्दिगीततः** यथा बन्दिनो राजानं तत्पराक्रमैर्बोधयन्ति तथा *'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत'* इति श्रुतिबन्दिगीततो बुध्यस्व। हे **त्र्यधीट्** विश्वाद्यभिमानित्वेन देहत्रयाधीश हे **भगवन्** पूजावन्। यद्वा त्रिगुणमायामृगीनर्तकत्वेन **त्र्यधीशत्वं** षड्गुणैश्वर्ययुक्तत्वा**द्भगवत्त्वं** तत्तत्पदार्थलक्षणं आभ्यां योगनिद्रित्वादिविशिष्टस्य जीवस्य सामानिधिकरणमुक्तम्। न हि जीवो नामेश्वरादत्यन्तं विविक्तवस्तुभूतो विषयः। *तत्त्वमसीति* श्रुत्यैतयोरखण्डैकरसत्वेनैक्यप्रतिपादनात्।।१।। अथ ध्यानम्। **यत** इति पदेन जगज्जन्मादिकारणत्वेऽपीश्वरस्याविकृतत्वमविक्रियत्वं अलिङ्गत्वं चोक्तम्। **यतो**ऽभिन्ननिमित्तोपादानभूतात्। **अस्य** सर्वैः प्रत्यक्षादिप्रमाणै -

।। अथ ध्यानम्।।

यतोऽस्य जननाद्यजः स्ववशमाय आद्यो विभुः
स्वराट् सकलविद्गुरुः स सुखसच्चिदात्मा प्रभुः।।
असंसृतिररूप उज्झिमलोऽमुमैक्याप्तये
निवर्त्य नयनं निषेधविधिवाक्यतश्चिन्तये ।।२।।

रनुभूयमानस्य जगतो **जननादि** जन्मस्थितिभङ्गा भवतीति शेषः। नन्वभिन्ननिमित्तोपादानकश्चेत् *'तदात्मानँस्वयमकुरुत'* इति श्रुतेरीश्वरस्य जन्मादिविकारित्वं प्राप्तमित्यत आह न जायत **ह्यजः**। 'नायं कुतश्चिन्न बभूव कश्चित्' इति श्रुतेर्मायया देहवानिव जात इव च लक्ष्यत इत्यर्थः। 'नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः' इति न्यायाधिकरणेनाजत्वेनोक्तोऽयं जीवः किम्। नेत्याह। **विभु**स्त्रिविधपरिच्छेदशून्यः। जीवस्तूपाधिपरिच्छिन्नः एव। किं ब्रह्मा। नेत्याह। **सकलविदो** ब्रह्मणोऽपि **गुरुः**। *'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै'* इति श्रुतेः। किं माया। नेत्याह। **स्वराट्**। तत्र हेतुः। **(स्व)वशमायः** विशुद्धसत्त्वोपाधित्वात्। अत एवा**द्यः** सर्वेषां कारणभूतोऽप्यकारणः। एवं तटस्थलक्षणमुक्तम्। स्वरूपलक्षणमाह- **प्रभु**रन्तर्यामित्वेन नियन्ता **सुखचिदात्मा** सच्चिदानन्दरूपः इति पारोक्ष्यात्तत्पदार्थोऽयम्। त्वंदार्थ उच्यते - **असंसृति**र्देहादिसंसाररहितः। **उज्झितमलः** तमोमलरहितो निर्विकारः देहेन्द्रियमनःप्राणाहंकारिभ्यो विलक्षणः 'प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः' इति पूर्वाचार्योक्तेः। अमुं अपरोक्षं प्रत्यञ्चं 'सत्यज्ञानानन्तब्रह्मनित्यशुद्धबुद्ध' इत्यादि**विधिवाक्या**नि 'अशब्दमस्पर्शमरूपम्' इत्यादि**निषेधवाक्या**नि अतद्व्यावृतिलक्षणानि तै**श्चिन्तये** ध्याये। किमर्थम्। **ऐक्याप्तये** अखण्डैकरसलाभाय। ननु *'पराञ्चि खानि व्यतृणत्स्वयम्भूः'* इति श्रुतेरिन्द्रियाणां पराक्त्वात्कथं प्रचीतश्चिन्तनमत आह। *'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुः'* इति श्रुतेर्वैराग्याभ्यासतः **नयनं** उपलक्षणात्समनस्केन्द्रियगणं **निवर्त्य** परावृत्य।।२।। *कार्यक्षमानीति*। **पृथग्युतान्** मिलितानपि महदहंकारादीन् व्यष्टिसमष्टि**कार्या**समर्था**न्वीक्ष्य** पर्यालोच्य **निजांशे-**

।। अथावाहनम्।।

कार्याक्षमान्वीक्ष्य पृथग्युतान्वा
योऽनुप्रविश्यापि विभुर्निजांशात्।।
निन्ये प्रभुत्वं हि महन्मुखांस्त-
मुपाह्वये त्रीशमनन्यचित्तः ।।३।।

।। अथासनम्।।

अनेजज्जवीयो हृदोऽप्याप्नुवन्नो
सुराः पूर्वमार्षत्पराञ्चोऽपि तिष्ठत्।।
परान्धावतोऽत्येति यद्ध्यासनं ते
त्र्यधीशार्पितं चित्तमस्तान्यवृत्ति ।।४।।

।। अथ पाद्यम्।।

राहोः शीर्षवदौपचारिकभिदा विष्णो पदं त्रीश ते
प्रत्यक्त्वाच्च निसर्गशुद्धमपि सन्मायांशतोऽशुद्धवत्।।५।।

नानुप्रविश्य तान् **प्रभुत्वं** कार्यसमर्थत्वं **यो निन्ये** तमहं **त्रीशमनन्यचित्तः** सन् समीपं प्रत्या**ह्वये**। *'तत्सृष्ट्वा तदेवानुप्राविशत्'* इति श्रुत्याऽपरिच्छिन्नरूपस्यापि प्रवेश उक्तस्तदु**पाह्वान** निरवद्यम्।।३।। *अनेजदिति*। यद्ब्रह्मा**नेजद**कम्पमक्रियमित्यर्थः। **हृदो** मनसोऽपि **जवीयो** वेगवत्तरम्। **सुरा वइन्द्रियाणि** यद्ब्रह्म **नाप्नुवन्**। *'न तत्र चक्षुर्गच्छति'* इति श्रुतेः। यस्माद्यद्ब्रह्म **पूर्व**मेवा**र्षद्**गतं व्योमवद्व्यापित्वात्। यत्स्वयं **तिष्ठत्**सत् **पराञ्चो** धावतो देवान् चक्षुरादीन**तीत्य** गच्छतीवे**ति** तिष्ठत्पदेन ज्ञेयम्। नेदं विरुद्धं सोपाधिकनिरुपाधिकत्वेनोक्तत्वात्। *'अनेजदेकम्'* इति श्रुतेश्च। ईदृग्रूप हे त्रीश, **ते** तुभ्यं **अस्तान्यवृत्ति** निर्वृत्तिकं **चित्त**मेवा**सनं दत्तम्**।।४।। *राहोः शीर्षेति*। पाद्यं दातुं निरवयवस्यापि पादकल्पनां विशुद्धस्य क्षालनप्रयोजनं चाह - हे **विष्णो**, **राहोः शिर** इति**वत्**पदौ**पचारिक**भेदेन त्वत्स्वरूपमेव पद्यते गम्यत इति व्युत्पत्त्या श्रुत्या *'तद्विष्णोः परमं पदम्'* इति कल्पितं तदेव **प्रत्यग्**रूपं स्वभाव**शुद्धमपि**

भातं मूढधियां तदर्थममलं ज्ञानामृतं यत्नतो
ध्यामत्रेऽत्र हिरण्मये विनिहितं पाद्यं गृहाणात्मभ ।।५।।

।। अथार्घ्यम्।।

देवाचार्यप्रसादप्रजनितसुरसंपत्तिसद्रत्नजात-
श्रेण्याढ्ये मञ्जुलेऽस्मिन्नतितरविमले भाजने वै विशाले।।
चेतःसंज्ञेऽविलोले धृतभजनजलाद्वेष्टृताद्यर्थजाले
स्वर्घ्यं संपादितं ते त्र्यधिप परम भोः स्वीकुरुष्वाप्तकाम।।६।।

।। अथाचमनम्।।

विधिवच्छ्रवणादि यत्कृतं ते त्र्यधिपाभव मे प्रसीद शंभो।।
द्विविधावरणं तेऽर्पितं सत्कृपयाऽऽचमनं कुरुष्व तेन ।।७।।

मायांशतः कामकर्मादिभिरशुद्धवन्मोहवशाद्**भातं मूढ**बुद्ध्यैव **तदर्थं** पादार्थं **अमलं** रागादिमलनिवर्तकं **ज्ञान**मेवा**मृतं** स्वादु जलं **यत्नतो** ब्रह्मचर्यादिसाधनैः कृत्वा **धी**रूपे **अमत्रे** पात्रे छन्दोनुरोधेन **ध्यामत्र** इत्युक्तम्। हिरण्यस्य विकारो **हिरण्मयं** "*दाण्डिनायन*" इति निपातनात्साधुः। तस्मिन् सत्त्वप्रधाने **विनिहितं** पादार्थमिदं **पाद्यं** "*पादार्घाभ्याम्*" इति यत्। यथा पूजायां दूर्वाब्जविष्णुक्रान्तापुष्पाढ्यस्वर्ण-पात्रोदकमर्घ्यार्थं समर्पयन्ति तथेदं मयार्पितं **गृहाण**। हे **आत्मभ** स्वयंप्रकाश।।५।। *देवाचार्येति*। ईश्वराभिन्नगुर्वनुग्रहजन्यदैवी**संपद**वोत्तम**रत्न**समूहा- स्तत्पङ्क्तियुक्ते मनोज्ञे सुविमले सु**विमले** स्थिरे महति चित्तनामके **भाजने** पात्रे। ज्ञानयोग्य इति यावत्। **धृतं भजनं** नवभक्तिरेव जलं **अद्वेष्टृत्वाद्यर्थजालं** च यस्मिन्नीदृशम्। यथोत्तमजलपूरिते स्वर्णपात्रे गन्धपुष्पयवसर्षपदूर्वातिलकुशाक्षतरत्नै- रर्घ्यं **संपाद**यन्ति तथा शोभन**मर्घ्यं ते** तुभ्यं **संपादितम्**। हे **परम** श्रेष्ठ **त्र्यधिप,** इदं **स्वीकुरुष्व**। किमनेनेत्यतः संबोधयति - **भो आप्तकामेति**। त्वमाप्तकामोऽपि भक्त्यर्थं गृहाण।।६।। *विधिवच्छ्रवणादिति*। हे **अभव** भवनिवर्तक, **त्र्यधिप**, **यद्य**स्माद्**विधिवद्**गुरूपसत्तिपूर्वकं षड्विधलिङ्गतात्पर्याव- धारणरूपं **ते** तव प्रत्यगभिन्नपरमात्मनः **श्रवणादि कृतम्**। *श्यति* दुःखं तनूकरोतीति *शं* सुखं तद्भवत्यस्मादिति **शंभु**स्तत्संबुद्धौ। **मे** मह्यं **प्रसीद** -

।। अथ स्नानम्।।

प्रवचनादिसुदुर्लभता श्रुतेस्त्र्यधिपते त इह श्रुतिविश्रुते।।

परमभक्तिसुशीतलसज्जलं वपुषि सिक्तमथाप्लुतयेऽस्त्वलम्।।८।।

।। अथ वस्त्रम्।।

यत्किञ्चिज्जगति त्रीश तत्त्वयाऽऽवास्यमीश ते।।

वस्त्रत्वेनार्पितं तेन परानन्दार्हतास्तु मे ।।९।।

।। अथ यज्ञसूत्रम्।।

यद्ब्रह्मसूत्रं त्रिवृतं पवित्रं कृत्वा समंत्रं त्रिप सस्वतन्त्रम्।।

दत्तं सुमित्रं भज तेन चात्र सत्त्रं सुपात्रं कुरु माऽन्यतन्त्रम्।।१०।।

।। अथ चन्दनम्।।

आह्लादनं चन्दनमुच्यते तत्सत्यर्तरूपं न ततः परं ते।।

प्रेष्ठं त्र्यधीशागुण तेन नूनमालेपनं ते प्रकरोमि भक्त्या।।११।

असंभावनादिनिवारणं कुर्विति भावः। असत्त्वावरणाभानावरणरूपजलमाचमनार्थं दत्तं तेनाचमनं कुरुष्व। आवरणरूपां स्वमायांमुपसंहरेति भावः। अत्र तव **सत्कृपै**व कारणम्।।७।। *प्रवचनादिति*। *'नायमात्मा प्रवचनेन लभ्यः'* ' *श्रवणायापि बहुभिर्यो नलभ्यः'* इति श्रवणाच्छ्रुतिख्याते **ते** इहापरोक्षे सत्यज्ञानादिलक्षणे **वपुषि परमभक्तिजलं सिक्तं** तत्ते स्नानाय पर्याप्तमस्तु।।८।। *यत्किञ्चिदिति*। हे **त्रीश**, **यत्किञ्चिज्जगति** स्थावरजङ्गमात्मकं जगत्**त्वया**ऽऽच्छादनीयं तदेव ते आच्छादनत्वेन दत्तम्। हे **परानन्द**, **तेन मे** *'सर्वेऽस्मै देवा बलिमावहन्ति'* इति योग्याताऽस्तु **परमानन्द**योग्यता वा**ऽस्तु**। ईशावास्यश्रुतौ धनाभिकाङ्क्षात्यागपूर्वकं परानन्दादरश्रवणात्।।९।। *यद्ब्रह्मेति*। य**त्स्वतंत्रं** ज्ञानस्य वस्तुतन्त्रत्वात्। **पवित्रं** अविद्याशोधकम्। उपकारकत्वात्**सुमित्रम्**। श्रवणादित्रया**वृतं** ब्रह्म सूत्र्यतेऽनेनेतीदृशं ज्ञानं तेन **मां सुपात्रं** जीवन्मुक्तेर्विदेहमुक्तेश्च योग्यं सतस्त्रायत इति **सत्त्रं** सन्मार्गवर्त्युद्धारणाक्षमं च **कुरु**। **अन्यतन्त्रं** विधिपरतंत्रं **मा कुरु**। हे **त्रिप**, त्रिविधजनपालक।।१०।। *आल्हादनमिति*। *चदि आह्लादन* इति धातो**श्चन्दन**माह्लादनं **तत्सत्यं** समदर्शनं **ऋतं** सूनृतावाणी **न ततो**ऽन्यत्काला-

।। अथ पुष्पम्।।

भगवंस्त्र्यधिप प्रददामि मुदे सुमनः सुमनाः सकलार्थविदे।।

खलु तुभ्यममूल्यमघौघभिदे सुमनः सुमनस्कमनन्यहृदे।।१२।।

।। अथ धूपम्।।

योगानलेऽत्र बलदर्पपरिग्रहाहं-

काराभिलाषममताप्रतिघांश्च दग्ध्वा।।

धूपोऽयमुत्तमतमोऽर्पित आर्य शान्ति-

द्वारा त्र्यधीश पदपर्यवसाय्यसौ ते ।।१३।।

।। अथ दीपः।।

सोऽहंभावप्रोज्वलज्ज्ञानदीपो मूलाज्ञानध्वान्तसंपातहृत्यै।।

स्थेयान्भास्वाँश्छाश्वतस्त्रीश तुभ्यं स्वात्मज्योतिर्दत्त एतं गृहाण।।१४।

।। अथ नैवेद्यम्।।

यस्य ब्रह्मक्षत्रे मित्रे ग्रासो मृत्युर्लेह्यं पेयम्।।

गुर्वादि लौकिकं **ते** प्रियतमम्। अतो हे **गुण**निवर्तक **त्र्यधीश** गुणत्रयनियन्तः, तेन **सत्यर्तरूपचन्दनेन भक्ति**पूर्वकं तवासमन्ता**ल्लेपनं करोमि**।।११।। *भगवंस्त्र्यधिपेति*। हे **भगवन्** त्रिकरणप्रवर्तक, **सुमनसां** वागाद्यधिष्ठात्रग्न्यादीनामपि शोभन**मनो**भूत, **मुदे** प्रीत्यै **अनन्य**स्मिन् भक्तेऽनुग्राह्यत्वेन **हृत्** यस्य तस्मै। **अघौघ**हर्त्रे **तुभ्यं** शोभनमत एव **सुमनस्कं** पुष्पोपचारं सत्त्वगुणेन शोभनत्वा**दमूल्यं प्रददामि**।।१२।। *योगानले* इति। '*अहंकारं बलं दर्पं* ' इति स्मृत्याऽहंकारादिनाशेनैव मोक्षयोग्यत्वप्रतिपादना**द्योगा**ग्नौ **बला**दीन्**दग्ध्वा** तत्र **प्रतिघः** क्रोधः **अयमुत्तमो धूपस्तेऽर्पितः**। हे **त्र्यधीश आर्य**, अयं धूपः **शान्तिद्वारा ते पदपर्यवसाय्यस्तु**।।१३।। *सोऽहंभाव* इति। **मूलाज्ञाना**न्धकारपरिहाराय **स्थेयान्** स्थिरतरः **शाश्वतो**ऽपक्षयशून्यः **भास्वान्** प्रकाशशीलः **सोऽहंभावप्रोज्वलज्ज्ञानदीपः तुभ्यं दत्तः**। हे **स्वात्मज्योतिः** स्वयंप्रकाश, **एतं** दीपं **गृहाण** यत्स्वीकरणाद्विदेहमुक्तिः।।१४।। *यस्य ब्रह्मेति*। '*यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः।। मृत्युर्यस्योपसेचनम्*' इति श्रुतेः। **यस्य -**

क्वान्वेष्टव्यं तस्मै कस्मै नैवेद्यार्थं दत्तं द्वैतम्।।१५।।

।। ताम्बूलमाह।।

त्रीश तेऽद्य परभक्तिवीटिका पञ्चमैकपुरुषार्थसाधिका।।
निर्विकल्पसमाधितः पुरा रञ्जिकाऽस्तु भवभञ्जिका वरा।।१६।।

।। अथ प्रदक्षिणा।।

त्वं त्रीशाहमहं त्वमित्यवगते स्थेम्ने निदिध्यासना-
त्मानस्ते परिदक्षिणया हि विहिता यद्यच्च मे क्रीडितम्।।
तद्ब्रह्मास्तु चिदन्वयेक्षितुरथो त्वानुस्मरन् व्याहरे-
त्तारं तारकमेकमात्मनि यथा शार्दूलविक्रीडितम् ।।१७।।

।। अथ नमस्कारः।।

असकृदभिहिता तेऽनेकजन्माप्तपुण्यैः
प्रणतिविततिरेषाद्वैतशेषाऽविशेषा।।
त्वयि विनिहितमेतन्मे ज्ञ सर्वं स्वकीयं
त्र्यधिप जयतु पूजा त्वद्यशोमालिनीयम् ।।१८।।

जगतोऽपि संहर्तुरात्मनो धर्मधारके **मित्र**भूते **ब्रह्मक्षत्रे ग्रासः मृत्यु**रशनसाधनं **लेह्यं तस्मै पेयं क्व** मृग्यम्। ईदृशाय **नैवेद्यार्थं द्वैतं दत्तम्**।।१५।। *त्रीश ते* इति। **परभक्ति**रीश्वरानुरक्तिर्ज्ञानोत्तरा गम्या '*बुद्ध्या विशुद्धया*' इत्युक्रम्य '*मद्भक्तिं लभते पराम्*' इत्युपसंहारात्। अन्यत्सुगमम्।।१६।। *त्वं त्रीशेति*। हे **त्रीश**, व्यतिहार**स्त्वमहं त्वमिति अवगतेः**। **स्थेम्ने** ज्ञानस्य स्थैर्याय **निदिध्यासन**रूपाः प्र**दक्षिणाः** कृताः। निदिध्यासनस्यावृत्तिगुणत्वात् '*आवृत्तिरसकृदुपदेशात्*' इति न्यायेनानुष्ठेयत्वात् **यन्मे** मया मनोवाक्कायैः **क्रीडितं तच्चिदन्वय**द्रष्टुर्मम **ब्रह्मै**व भवतु। **आत्मनि** शुद्धान्तःकरणे**ऽनुस्मरन्** भव**तारकं तारं** प्रणवं दीर्घं **व्याहरेत्**। यथा **शार्दूलस्य** वाङ्मयं **विक्रीडितं** तथा वृत्तमपि।।१७।। *असकृदिति*। **अनेकजन्मो**पार्जित**पुण्यैः** पुनः पुनः प्रणामपरंपराः लीनत्वमिति यावत्। कथंभूताः। **अद्वैत**मेव **शिष्यते**ऽनयेति तथा। न विद्यते **विशेषो** उत्कर्षो यस्यास्तथाभूता च हे

।। अथ क्षमापनम्।।

यन्मे न्यूनं संमतं स्थूलदृष्ट्या भूमन् तेऽनुक्रोशपीयूषवृष्ट्या।।
नित्यं प्रेयः स्वप्रभं शालिनीयं तस्याभूत्संपूर्णता शालिनीयम्।।१९।।

रोधनं द्व्यात्मनः शोधनं चात्मनः
पूजनं त्र्यात्मनो भोजनं स्वात्मनः ।।
यत्र सैषाऽऽत्मपूजाऽस्तु कण्ठे सतां
स्त्रग्विणी मा परा स्त्रीव कण्ठेऽसताम् ।।२०।।

।। श्रीमद्वासुदेवानंदसरस्वतीविरचिताऽऽत्मपूजा समाप्ता।।

ज्ञ, **मे** मया **सर्वं स्वकीयं** स्वाध्यस्तदेहादिकं **त्वयि विनहितं** समर्पितम्। हे **त्र्यधिप**, **त्वद्यशोमालिनी इयं पूजा जयतु**।।१८।। *यन्मे न्यूनमिति*। **यन्मे** मम **स्थूलदृष्ट्या** पूर्वं किञ्चिज्ज्ञत्वादि **न्यूनं संमतं** हे **भूमन्** अपरिच्छिन्न, अधुना तव कृपामृतवृष्ट्या **नित्यं** *शालिन्यां* आत्मविद्यायां भवं **शालिनीयं प्रेयः** प्रियतमं **स्व**यंप्रकाशं जातं अत एव **तस्येयं शालिनी** प्रकाशशीला **संपूर्णता**ऽअखण्डैकरसता**ऽभूत्**।।१९।। अलंकारेणोपसंहरति - *रोधनमिति*। **यत्र** यस्यां पूजायां **द्व्यात्मनः** संकल्पविकल्पात्मकस्य मनसो **रोधनं** यत्र**ात्मनो** बुद्धेः रागादिभ्यः **शोधनं** स्वरूपभूतस्या**त्मनः** परमानन्द**भोजनं त्र्यात्मन**स्त्रिगुणात्मकस्य श्रीदत्तात्रेयस्य सर्वत्र सामानाधिकरण्येन **पूजनं** च **सैषाऽऽत्मपूजा सतां कण्ठे स्त्रग्विणी** पद्मरूपस्त्रग्वती मालारूपा**ऽस्तु**। तस्याः **परा**ऽन्या या गजाश्वधनदासादिलक्षणा सा **असतां कण्ठे** *स्त्रग्विणी* स्त्री**व मा**ऽस्तु।।२०।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवानंदसरस्वतीविरचिताऽऽत्मपूजादीपिका समाप्ता।।